# श्रीविद्यानिधितीर्थाष्टकम्

रामचन्द्रकराब्जोत्थं रघुनाथमहागुरुम् ।
वैराग्यभूषणं शान्तं विद्यानिधिमहं श्रये ॥१॥

मूलरामपदपङ्कजभृङ्गं व्यासपंचकशुभाञ्चनसक्तम् ।
श्रीधरादिभगवत्पदचित्तं शास्त्रपूर्णसुमहानिधिमीडे ॥२॥

यद्भक्तिपूर्णामृतवाग्विलासैः
श्रीमूलरामः प्रकटोऽभवद्ध्रुवः ।
तं ज्ञानपूर्णं कुहकातिदूरं
विद्यानिधिं भाग्यनिधिं श्रयेऽहम् ॥३॥

श्रीमद्भागवतस्थपञ्चमगता गद्याभिधा नर्तकी
यज्जिह्वाशुभरङ्गमञ्चविषये स्वैरं नरीनृत्यति ।
यद्बुद्धौ विविधाः कला विलसिता वेदादिविद्यायुताः
सोऽयं सिद्धमहामुनीशविनुतो विद्यानिधी राजते ॥४॥

मणिपुरवरभूमौ सद्विमाने विशाले
ध्रुवकरवरपूजाभाजनं केशवेशम् ।
स्वकरवरसरोजप्राप्तदिव्यप्रतिष्ठं
ह्यकुरुत वरभक्त्या नौमि विद्यानिधिं तम् ॥५॥

यरगोळकृतावासं गुरुसन्निधिशोभितम् ।
विद्यानिधिमहं वन्दे विद्यानिधिगुरुप्रियम् ॥६॥

जयतीर्थतटाकस्य तटे तपसि संस्थितम् ।
जयतीर्थग्रन्थमग्नं विद्यानिधिमहं भजे ॥७॥

विद्यासन्तानसौभाग्यभक्तिवैराग्यभाग्यदम् ।
आरोग्यभाग्यदं शुद्धं सेवे विद्यानिधिं मुदा ॥८॥

सत्यात्मभिक्षुणा बद्धं विद्यानिध्यष्टकं शुभम् ।
यः पठेच्छृणुयाद्वापि स विद्याया निधिर्भवेत् ॥९॥